# uDupi shrIkRiShNa suprabhAtam

# उडुपि श्रीकृष्ण सुप्रभातम्

## Document Information

Text title : uDupikRishNasuprabhAtam

File name : uDupikRishNasupra.itx

Category : suprabhAta, vishhnu, krishna, vishnu

Location : doc_vishhnu

Proofread by : Ambarish Srivastava (j_ambarish at yahoo.chom)

Latest update : January 15, 2004

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# उडुपि श्रीकृष्ण सुप्रभातम्

उत्तिष्ठोत्तिष्ठ गोविन्द उत्तिष्ठ गरुडध्वज ।
उत्तिष्ठ कमलाकान्त त्रैलोक्यं मङ्गलं कुरु .. ..

नारायणाखिल शरण्य रथाङ्ग पाणे ।
प्राणायमान विजयागणित प्रभाव ।
गीर्वाणवैरि कदलीवन वारणेन्द्र ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥ १॥

उत्तिष्ठ दीन पतितार्तजनानुकम्पिन् ।
उत्तिष्ठ विश्व रचना चतुरैक शिल्पिन् ।
उत्तिष्ठ वैष्णव मतोद्भव धामवासिन् ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥ २॥

उत्तिष्ठ पातय कृपामसृणान् कटाक्षान् ।
उत्तिष्ठ दर्शय सुमङ्गल विग्रहन्ते ।
उत्तिष्ठ पालय जनान् शरणं प्रपन्नान् ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥ ३॥

उत्तिष्ठ यादव मुकुन्द हरे मुरारे ।
उत्तिष्ठ कौरवकुलान्तक विश्वबन्धो ।
उत्तिष्ठ योगिजन मानस राजहंस ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥ ४॥

उत्तिष्ठ पद्मनिलयाप्रिय पद्मनाभ ।
पद्मोद्भवस्य जनकाच्युत पद्मनेत्र ।
उत्तिष्ठ पद्मसख मण्डल मध्यवर्तिन् ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥ ५॥

मध्वाख्यया रजतपीठपुरेवतीर्णः ।

त्वत्कार्य साधनपटुः पवमान देवः ।
मूर्तेश्चकार तव लोकगुरोः प्रतिष्ठाम् ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥ ६॥

सन्यास योगनिरताश्रवणादिभिस्त्वाम् ।
भक्तेर्गुणैर्नवभिरात्म निवेदनान्तैः ।
अष्टौयजन्ति यतिनो जगतामधीशम् ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥ ७॥

या द्वारकापुरि पुरातव दिव्यमूर्तिः ।
सम्पूजिताष्ट महिषीभिरनन्य भक्त्या ।
अद्यार्चयन्ति यतयोष्टमठाधिपास्ताम् ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥ ८॥

वामेकरे मथनदण्डमसव्य हस्ते ।
गृह्णंश्च पाशमुपदेष्टु मना इवासि ।
गोपालनं सुखकरं कुरुतेति लोकान् ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥ ९॥

सम्मोहिताखिल चराचररूप विश्व ।
श्रोत्राभिराममुरली मधुरारवेण ।
आधायवादयकरेण पुनश्चवेणुम् ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥ १०॥

गीतोष्णरश्मिरुदयन्वहनोदयाद्रौ ।
यस्याहरत्सकललोकहृदान्धकारम् ।
सत्वं स्थितो रजतपीठपुरे विभासी ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥ ११॥

कृष्णेति मङ्गलपदं कृकवाकुवृन्दम् ।
वक्तुं प्रयत्य विफलं बहुशः कुकूकुः ।
त्वां सम्प्रबोधयितुमुच्चरतीतिमन्ये ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥ १२॥

भृङ्गापिपासव इमे मधु पद्मषन्दे ।
कृष्णार्पणं सुमरसो स्वितिहर्षभाजः ।
झङ्कार राव मिषतः कथयन्ति मन्ये ।

मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥ १३॥

निर्यान्ति शावक वियोगयुता विहङ्गाः ।
प्रीत्यार्भकेशु च पुनः प्रविशन्ति नीडम् ।
धावन्ति सस्य कणिकानुपचेतु मारात् ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥ १४॥

भूत्वातिथिः सुमनसामनिलः सुगन्धम् ।
सङ्गृह्यवाति जनयन् प्रमदं जनानाम् ।
विश्वात्मनोर्चनधियातव मुञ्च निद्राम् ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥ १५॥

तारालि मौक्तिक विभूषण मण्डिताङ्गी ।
प्राचीदुकूल मरुणं रुचिरं दधान ।
खेसौखसुप्तिक वधूरिव दृश्यतेद्य ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥ १६॥

आलोक्य देह सुषमां तव तारकालिः ।
ह्रीणाक्रमेण समुपेत्य विवर्णभावम् ।
अन्तर्हितेवनचिरात्यज शेषशय्याम् ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥ १७॥

साध्वीकराब्जवलयध्वनिनासमेतो ।
गानध्वनिः सुदधि मन्थन घोष पुष्टः ।
संश्रूयते प्रतिग्रहं रजनी विनष्टा ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥ १८॥

भास्वानुदेश्यति हिमांशुर भूद्गतश्रीः ।
पूर्वान्दिशामरुणयन् समुपैत्यनूरुः ।
आशाः प्रसाद सुभगाश्च गतत्रियामा ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥ १९॥

आदित्य चन्द्र धरणी सुत रौहिणेय ।
जीवोशनः शनिविधुं तुदकेतवस्ते ।
दासानुदास परिचारक भृत्य भृत्य ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥ २०॥

इन्द्राग्नि दण्डधर निर्रीति पाशिवायु ।
वित्तेश भूत पतयो हरितामधीशाः ।
आराधयन्ति पदवी च्युति शङ्कया त्वाम् ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥ २१॥

वीणां सती कमलजस्य करे दधाना ।
तन्त्र्यागलस्य चरवे कलयन्त्य भेदम् ।
विश्वं निमज्जयति गानसुधारसाब्धौ ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥ २२॥

देवर्षिरंबर तलादवनीं प्रपन्नः ।
त्वत्सन्निधौ मधुरवादित चारु वीणा ।
नामानिगायति नत स्फुरितोत्तमाङ्गो ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥ २३॥

वातात्मजः प्रणत कल्प तरुर्हनूमान् ।
द्वारे कृताञ्जलि पुटस्तवदर्शनार्थी ।
तिष्ठत्यमुं कुरुकृतार्थमपेत निद्रम् ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥ २४॥

सर्वोत्तमो हरिरिति श्रुतिवाक्य वृन्दैः ।
चन्द्रेश्वर द्विरदवक्र षडाननाद्याः ।
उद्घोशयन्त्य निमिषा रजनी प्रभात ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥ २५॥

मध्वाभिदे सरसि पुण्यजले प्रभाते ।
गङ्गेंभ सर्वमघमाशु हरेति जप्त्वा ।
मज्जन्ति वैदिक शिखामणयो यथावन् ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥ २६॥

द्वारे मिलन्ति निगमान्त विदस्त्रयीज्ञाः ।
मीमांसकाः पदविदोनयदर्शनज्ञाः ।
गान्धर्ववेद कुशलाश्च तवेक्षणार्थम् ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥ २७॥

श्री मध्वयोगि वरवन्दित पादपद्म ।
भैष्मी मुखांभोरुह भास्कर विश्ववन्द्य ।

दासाग्रगण्य कनकादिनुत प्रभाव ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥ २८॥

पर्याय पीठ मधिरुह्य मठाधिपास्त्वाम् ।
अष्टौ भजन्ति विधिवत् सततं यतीन्द्राः ।
श्री वादिराजनियमान् परिपालयन्तो ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥ २९॥

श्रीमन्ननन्त शयनोडुपिवास शौरे ।
पूर्णप्रबोध हृदयांबर शीत रश्मे ।
लक्ष्मीनिवास पुरुषोत्तम पूर्णकाम ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥ ३०॥

श्री प्राणनाथ करुणा वरुणालयार्त ।
सन्त्राण शौन्द रमणीय गुणप्रपूर्ण ।
सङ्कर्षणानुज फणीन्द्र फणा वितान ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥ ३१॥

आनन्दतुन्दिल पुरन्दर पूर्वदास ।
वृन्दाभिवन्दित पदांबुजनन्द सूनो ।
गोविन्द मन्दरगिरीन्द्र धरांबुदाभ ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥ ३२॥

मीनाकृते कमठरूप वराहमूर्ते ।
स्वामिन् नृसिंह बलिसूदन जामदग्न्यः ।
श्री राघवेन्द्र यदुपुङ्गव बुद्ध कल्किन् ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥ ३३॥

गोपाल गोप ललनाकुलरासलीला ।
लोलाभ्रनील कमलेश कृपालवाल ।
कालीयमौलि विलसन्मणिरञ्जिताङ्घ्रे ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥ ३४॥

कृष्णस्य मङ्गल निधेर्भुवि सुप्रभातम् ।
येहर्मुखे प्रतिदिनं मनुजाः पठन्ति ।
विन्दन्ति ते सकल वाञ्छित सिद्धिमाशु ।
ज्ञानञ्च मुक्ति सुलभं परमं लभन्ते ॥ ३५॥

॥ श्रीकृष्णार्पणमस्तु ॥

Edited by Ambarish Srivastava j_ambarish@yahoo.com

*uDupi shrIkRiShNa suprabhAtam*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*